श्री शिव हृदयं

श्री शिव हृदयं

अस्य श्री शिवहृदयस्तोत्र महामंत्रस्य वामदेव ऋषिः पंक्त्यैश्छंधः श्रीसांबसदाशिव देवताः ॐ बीजं नमः शक्तिः शिवायेति कीलकं मम चतुर्वर्ग फलाप्तये श्रीसांबसदाशिव हृदय मंत्र जपे विनियोगः |

ऋष्यादिन्यासः |
वामदेव ऋषिभ्यो नमः शिरसि | पंक्त्यैश्छंदसे नमः मुखे | श्रीसांबसदाशिवाय देवतायै नमः हृदि | ॐ बीजाय नमः गुह्ये | नमः शक्तये नमः पादयोः | शिवायेति कीलकाय नमः नाभौ | विनियोगाय नमः इदि करसंपुटे |

करन्यासः |
ॐ सदाशिवाय अंगुष्ठाभ्यां नमः |
नं गंगाधराय तर्जनीभ्यां नमः |
मं मृत्युंजयाय मध्यमाभ्यां नमः |
शिं शूलपाणये अनामिकाभ्यां नमः |
वां पिनाकपाणये कनिष्ठिकाभ्यां नमः |
यं उमापतये करतलकरपृष्ठाभ्यां नमः |

अंगन्यासः |
ॐ सदाशिवाय हृदयाय नमः |
नं गंगाधराय शिरसे स्वाहा |
मं मृत्युंजयाय शिखायै वषट् |
शिं शूलपाणये कवचाय हुं |
वां पिनाकपाणये नेत्रत्रयाय वौषट् |
यं उमापतये अस्त्राय फट् |
भूर्भुवस्सुवरोमितिदिग्भंधः |

ध्यानं |
वामांकन्यस्त वामेतरकरकमलायास्तथा वामहस्त
न्यस्ता रक्तोत्पलायाः स्तनपरिविलसद्वामहस्त प्रियायाः |
सर्वाकल्पाभिरामो धृत परशुः मृगाभीष्टदः कांचनाभः
ध्येयः पद्मासनस्थः स्मर ललितवपुः संपदे पार्वतीशः | |

स्तोत्रं |

ॐ प्रणवो मे शिरः पातु मायाबीजं शिखां मम |
प्रासादो हृदयं पातु नमो नाभिं सदाऽवतु || 1 ||

लिंगं मे शिवः पायादष्टार्णं सर्वसंधिषु |
धृवः पादयुगं पातु कटिं माया सदाऽवतु || 2 ||

नमः शिवाय कंठं मे शिरो माया सदाऽवतु |
शक्त्यष्टार्णः सदा पायादापादतलमस्तकं || 3 ||

सर्वदिक्षु च वर्णव्याहृत् पंचार्णः पापनाशनः |
वाग्बीजपूर्वः पंचार्णो वाचां सिद्धिं प्रयच्छतु || 4 ||

लक्ष्मीं दिशतु लक्ष्यार्थः कामाद्य काममिच्छतु |
परापूर्वस्तु पंचार्णः परलोकं प्रयच्छतु || 5 ||

मोक्षं दिशतु ताराद्यः केवलं सर्वदाऽवतु |
त्र्यक्षरी सहितः शंभुः त्रिदिवं संप्रयच्छतु || 6 ||

सौभाग्य विद्या सहितः सौभाग्यं मे प्रयच्छतु |
षोडशीसंपुटतः शंभुः सर्वदा मां प्ररक्षतु || 7 ||

एवं द्वादश भेदानि विद्यायाः सर्वदाऽवतु |
सर्वमंत्रस्वरूपश्च शिवः पायान्निरंतरं || 8 ||

यंत्ररूपः शिवः पातु सर्वकालं महेश्वरः |
शिवस्यपीठं मां पातु गुरुपीठस्य दक्षिणे || 9 ||

वामे गणपतिः पातु श्रीदुर्गा पुरतोऽवतु |
क्षेत्रपालः पश्चिमे तु सदा पातु सरस्वती || 10 ||

आधारशक्तिः कालाग्निरुद्रो मांडूक संज्ञितः |
आदिकूर्मो वराहश्च अनंतः पृथिवी तथा || 11 ||

एतान्मां पातु पीठाधः स्थिताः सर्वत्र देवताः |
महार्णवे जलमये मां पायादमृतार्णवः || 12 ||

रत्नद्वीपे च मां पातु सप्तद्वीपेश्वरः तथा |
तथा हेमगिरिः पातु गिरिकानन भूमिषु || 13 ||

मां पातु नंदनोद्यानं वापिकोद्यान भूमिषु |
कल्पवृक्षः सदा पातु मम कल्पसहेतुषु || 14 ||

भूमौ मां पातु सर्वत्र सर्वदा मणिभूतलं |
गृहं मे पातु देवस्य रत्ननिर्मितमंडपं || 15 ||

आसने शयने चैव रत्नसिंहासनं तथा |
धर्मं ज्ञानं च वैराग्यमैश्वर्यं चाऽनुगच्छतु || 16 ||

अथाऽज्ञानमवैराग्यमनैश्वर्यं च नश्यतु |
सत्त्वरजस्तमश्चैव गुणान् रक्षंतु सर्वदा || 17 ||

मूलं विद्या तथा कंदो नाळं पद्मं च रक्षतु |
पत्राणि मां सदा पातु केसराः कर्णिकाऽवतु || 18 ||

मंडलेषु च मां पातु सोमसूर्याग्निमंडलं |
आत्माऽत्मानं सदा पातु अंतरात्मांतरात्मकं || 19 ||

पातु मां परमात्माऽपि ज्ञानात्मा परिरक्षतु |
वामा ज्येष्ठा तथा श्रेष्ठा रौद्री काळी तथैव च || 20 ||

कलपूर्वा विकरणी बलपूर्वा तथैव च |
बलप्रमथनी चापि सर्वभूतदमन्यथ || 21 ||

मनोन्मनी च नवमी एता मां पातु देवताः |
योगपीठः सदा पातु शिवस्य परमस्य मे || 22 ||

श्रीशिवो मस्तकं पातु ब्रह्मरंध्रमुमाऽवतु |
हृदयं हृदयं पातु शिरः पातु शिरो मम || 23 ||

शिखां शिखा सदा पातु कवचं कवचोऽवतु |
नेत्रत्रयं पातु हस्तौ अस्त्रं च रक्षतु || 24 ||

ललाटं पातु हृल्लेखा गगनं नासिकाऽवतु |
राका गंडयुगं पातु ओष्ठौ पातु कराळिकः || 25 ||

जिह्वां पातु महेष्वासो गायत्री मुखमंडलं |
तालुमूलं तु सावित्री जिह्वामूलं सरस्वती || 26 ||

वृषध्वजः पातु कंठं क्षेत्रपालो भुजौ मम |
चंडीश्वरः पातु वक्षो दुर्गा कुक्षिं सदाऽवतु || 27 ||

स्कंदो नाभिं सदा पातु नंदी पातु कटिद्वयं |
पार्श्वौ विघ्नेश्वरः पातु पातु सेनापतिर्वळिं || 28 ||

ब्राह्मीलिंगं सदा पायादसितांगादिभैरवाः |
रुरुभैरव युक्ता च गुदं पायान्महेश्वरः || 29 ||

चंडयुक्ता च कौमारी चोरुयुग्मं च रक्षतु |
वैष्णवी क्रोधसंयुक्ता जानुयुग्मं सदाऽवतु || 30 ||

उन्मत्तयुक्ता वाराही जंघायुग्मं प्ररक्षतु |
कपालयुक्ता माहेंद्री गुल्फौ मे परिरक्षतु || 31 ||

चामुंडा भीषणयुता पादपृष्ठे सदाऽवतु |
संहारेणयुता लक्ष्मी रक्षेत् पादतले उभे || 32 ||

पृथगष्टौ मातरस्तु नखान् रक्षंतु सर्वदा |
रक्षंतु रोमकूपाणि असितांगादिभैरवाः || 33 ||

वज्रहस्तश्च मां पायादिंद्रः पूर्वे च सर्वदा |
आग्नेय्यां दिशि मां पातु शक्ति हस्तोऽनलो महान् || 34 ||

दंडहस्तो यमः पातु दक्षिणादिशि सर्वदा |
निर्ऋतिः खड्गहस्तश्च नैर्ऋत्यां दिशि रक्षतु || 35 ||

प्रतीच्यां वरुणः पातु पाशहस्तश्च मां सदा |
वायव्यां दिशि मां पातु ध्वजहस्तः सदागतिः || 36 ||

उदीच्यां तु कुबेरस्तु गदाहस्तः प्रतापवान् |
शूलपाणिः शिवः पायादीशान्यां दिशि मां सदा || 37 ||

कमंडलुधरो ब्रह्मा ऊर्ध्वं मां परिरक्षतु |
अधस्ताद्विष्णुरव्यक्तश्चक्रपाणिः सदाऽवतु || 38 ||

ॐ ह्रौं ईशानो मे शिरः पायात् |
ॐ ह्रैं मुखं तत्पुरुषोऽवतु || 39 ||

ॐ ह्रूं अघोरो हृदयं पातु |
ॐ ह्रीं वामदेवस्तु गुह्यकं || 40 ||

ॐ ह्रां सद्योजातस्तु मे पादौ |
ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः पातु मे शिखां || 41 ||

फलश्रुति |
अनुक्तमपि यत् स्थानं तत्सर्वं शंकरोऽवतु |
इति मे कथितं नंदिन् शिवस्य हृदयं परं || 42 ||

मंत्रयंत्रस्थ देवानां रक्षणात्मकमद्भुतं |
सहस्रावर्तनात्सिद्धिं प्राप्नुयान्मंत्रवित्तमः || 43 ||

शिवस्य हृदयेनैव नित्यं सप्ताभिमंत्रितं |
तोयं पीत्वेप्सितां सिद्धिं मंडलाल्लभते नरः || 44 ||

वंध्या पुत्रवती भूयात् रोगी रोगात् विमुच्यते |
चंद्र सूर्यग्रहे नद्यां नाभिमात्रोदके स्थितः || 45 ||

मोक्षांतं प्रजेपेद्भक्त्या सर्वसिद्धीश्वरो भवेत् |
रुद्रसंख्या जपाद्रोगी नीरोगी जायते क्षणात् || 46 ||

उपोषितः प्रदोषे च श्रावण्यां सोमवासरे |
शिवं संपूज्य यत्नेन हृदयं तत्परो जपेत् || 47 ||

कृत्रिमेषु च रोगेषु वातपित्तज्वरेषु च |
त्रिसप्तमंत्रितं तोयं पीत्वाऽरोग्यमवाप्नुयात् || 48 ||

नित्यमष्टोत्तरशतं शिवस्य हृदयं जपेत् |
मंडलाल्लभते नंदिन् सिद्धिदं नात्र संशयः || 49 ||

किं बहूक्तेन नंदीश शिवस्य हृदयस्य च |
जपित्वातु महेशस्य वाहनत्वमवाप्स्यसि || 50 ||

इति श्रीलिंगपुराणे उत्तरभागे वामदेवनंदीश्वरसंवादे शिवहृदयस्तोत्र निरूपणं नाम अष्टषष्टितमोध्यायः समाप्तः |